# सम्पादकीयम्

ज्ञानार्थकविद्-धातोः क्यपि निष्पन्नोऽयं विद्याशब्दोऽमृतत्वनिष्पादनोद्देश्यकं तत्त्वसाक्षात्काररूपमर्थं द्योतयति। विद्ययाऽमृतमश्नुत इति श्रुतिः। सा विद्या या विमुक्तय इति स्मृतिः। विद्या ददाति विनयम् इति च नीतिविदः। विद्यापि परापरभेदेन द्विविधा। तत्र लौकिक-व्यावहारिक-विषयसम्बद्धानि शास्त्राण्यपरेत्यभिधीयते। सा परा यया तदक्षरमधिगम्यते। तयैवामृतत्वप्राप्तिरिति। तत्त्वसाक्षात्काररूपेऽर्थे साध्या विद्या विवक्षिता। तत्साधनभूते शास्त्रे विवक्षिते तु सा साधनरूपा। परा साध्यरूपा, अपरा साधनरूपेति विशेषः।

सा चेयं विद्या न केवलं शास्त्राध्ययनेनाधिगता भवति, किन्तु तत्र नैरन्तर्येणाभ्यासोऽप्यपेक्षितो भवति। ग्रन्थतात्पर्यबोधाय पौनःपुन्येनावर्तनं तत्तात्पर्यविचारो वाऽभ्यासः। अभ्यासोऽपि पञ्चधा। यथोक्तम् - वेदस्वीकरणं पूर्वं विचाराभ्यसनं जपः। तद्दानञ्चैव शिष्येभ्यो वेदाभ्यासो हि पञ्चधा। महाभाष्यकारस्तु कालभेदेन चतुर्धा विद्याधिगता भवतीत्याह। यथा- चतुर्भिश्च प्रकारैर्विद्योपयुक्ता भवति- आगमकालेन, स्वाध्यायकालेन, प्रवचनकालेन, व्यवहारकालेनेति। तत्रागमकालो नाम शास्त्राणामध्ययनकालः। स्वाध्यायकालस्तु स्वयमेव शास्त्रतात्पर्यानुसन्धानकालः। ततः प्रवचनकालेऽधीतस्यानुसंहितस्य च विषयस्य सत्यापनं तत्प्रकाशश्च विधीयते। तदनन्तरमेव व्यवहारे प्रयोग इति। शास्त्रान्तरेऽपि - अधीतिः, बोध, आचरणम्, प्रचारश्चेति विद्याधानस्य चत्वारि चरणानि प्रदर्शितानि सन्ति। एतच्चरणचतुष्टयमेव दार्शनिकसरण्यां श्रवण-मनन-निदिध्यासन-साक्षात्काररूपेणाप्यभिधीयते। तत्रापि मनननिदिध्यासनेऽनुसन्धानसम्बद्ध एव। तान्येतानि विद्याधानसोपानानि परस्परसम्बद्धानि सन्तीति नाविदितं धीमताम्।

नेपालसंस्कृतविश्वविद्यालयान्तर्गतविश्वविद्यालयविद्यापीठे तत्तच्छास्त्राध्ययनाध्यापनानुसन्धाननिरता आचार्या अन्तेवासिनश्च स्वशास्त्रसम्बद्धान्विविधविषयानाश्रित्य स्वमेधया शास्त्रतात्पर्यमन्वेषयन्ते। तच्चानुसन्धानविधानं प्रचलितप्राच्यावाच्यसिद्धान्तानुगुणं प्रकाशनार्हं भवेदित्यनुसन्धानव्यवस्थापनार्थं साम्प्रतिकं विश्वविद्यालयीयनिर्देशनमनुसृत्य विद्यापीठेस्मिन् अनुसन्धानव्यवस्थापनसमितिः (Research Management Cell) संघटितास्ति। समित्याऽनया प्रतिवर्षं प्रकाश्यमानाया अन्वेषणाख्यानुसन्धानात्मकशोधपत्रिकायास्तृतीयोऽङ्को हायनेऽस्मिन् प्राकाश्यमानीयत इति परमो मोदावहो विषयः। विज्ञसमीक्षितेयं पत्रिका साम्प्रतं नेपजोल (Nepal Jornals OnLine {NepJOL}) इत्यतोऽपि प्रकाश्यत इत्यपरं वैशिष्ट्यम्।

अन्त्ये, अन्वेषणाया प्रकाशने दत्तावधाना गुरवस्तथानुसन्धाननिरता लेखकाश्च नितान्तं धन्यवादार्हाः। एवं विपश्चिदपश्चिमानां विषयविशेषज्ञानां समुचितपरामर्शप्रदातॄणां विदुषां सम्पादनसहायकानाञ्चाधमर्ण्यं वहामः। एवं विश्वविद्यालयस्य पदाधिकारिणः विद्यापीठस्यास्य प्राचार्याः प्रशासकाः लेखाधिकारिणश्च धन्यवादवचोभिः सभाज्यन्ते। एवञ्च टङ्कण-मुद्रण-सज्जीकरणादिकृत्यैरन्वेषणासम्पादनप्रकाशनसहायकाः सर्वेऽपि धन्यवादार्हाः।

**- प्रा. डा. गुरुप्रसादसुवेदी**

**प्रधानसम्पादकः**